॥ श्रीजिनाय नमः ॥

# ॥ श्रीमहावीरजिनस्तुतिसंग्रहः सटीकः

---

पावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा )
वीरसंवत—२४४०. विक्रमसंवत्—१९७०. सने—१९१४.
किं रु.—०—१४—०
श्रीजैनभास्करोदय प्रेस. जामनगर.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ श्रीजिनाय नमः ॥

# अथ श्रीमहावीरजिनस्तुतिसंग्रहः सटीकः प्रारभ्यते ॥

छपावी प्रसिद्ध करनार–पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा )

॥ मूलम् ॥—वीरं देवं नित्यं वंदे ॥ १ ॥ व्याख्या—कल्याणकमलाकेलि—स्फुर्जत्सुंदरमंदिरं ॥ वर्धमानयशोराशिं । वर्धमानमुपास्महे ॥ १ ॥ श्रीमद्गुरोः पदांभोज—मभिनोनूय भावनः ॥ सिद्धिसाम्राज्यसंतान—कारकं विश्वतारकं ॥ २ ॥ अत्युक्तेत्यभिधछंदो—वत्याः श्रीनामसंजुषः ॥ अवदाराया महावीर—स्तुतेर्वृत्तिं तनोम्यहं ॥ ३ ॥ युग्मं ॥ इह हि किल निखिलसुंदरमहिमामंदिरमेदिनीमंडलमंडनमहीपालमंडलीमौलिमौलिमणिमरीचिचंचलचंचरीकचक्रवालचुंबितचरणारविंदकोविदकदंबककोटाकोटीकंठालंकारस्फारहारस्तुतिकारः स्तुतिचतुष्टयं व्यनक्ति—तत्र प्रथमा स्तुतिरुद्दिष्टस्य जिनस्य, द्वितीया सर्वेषां जिनानां, तृतीयागमस्य, चतुर्थी वैयावृत्त्यकरदेवताया भवति. यत उक्तं वंदनकभाष्ये—अहिगयजिणपढमथुई । बीया सवाण तइय नाणस्स ॥ वेयावच्चगराणउ ।

उवजगबं चउब्बथुई ॥ १ ॥ इति. अथ यथोद्देशस्तथा निर्देश इति न्यायात् स्तुतिचतुष्टये प्रथमाधिकारे प्रथमामधिगतजिनश्रीमहावीरस्तुतिमाह—' वीरमिति ' व्याख्या—अहं वीरं चतुर्विंशतितमं तीर्थंकरं वंदे, विशुद्धमानसप्रणिधानसमन्वितेन काययोगेन नमस्कुर्वे, वाग्योगेन च स्तुवे, वदि अभिवादनस्तुत्योरिति वचनात्, इति क्रियाकारकसंटंकः. कर्त्रुक्तिः—अत्र वंदे इत्याख्यातपदेनाभिहिते अहमिति प्रथमांतं कर्तृपदं लभ्यते, लिंगार्थे प्रथमेति सूत्रेणेति, कं? वीरं, ईरगतिप्रेरणयोः, विपूर्वः, विशेषेण ईरयति प्रेरयति कर्माणीति वीरः, पचिनंदिग्रहादेरिति अ प्रत्ययः. विदारयति यत्कर्म । तपसा च विराजते ॥ तपोवीर्येण युक्तश्च । तस्माद्वीर इति स्मृतः ।१। इति. लक्षणनिरुक्ताहा वीरः, वीरत्वं च दानयुद्धधर्मभेदात्त्रिधा, यदाहुः—कृत्वा हाटककोटिभिर्जगदसद्दारिद्र्यमुद्रा कथं । हत्वा गर्भशयानपि स्फुरदरीन् मोहादिवंशोद्भवान् ॥ तप्त्वा दुस्तपमस्पृहेण मनसा कैवल्यहेतुं तप—स्त्रेधा वीरयशो दधद्विजयतां वीरस्त्रिलोकी गुरुः ॥ १ ॥ इति. यद्वा विशेषेण ईरयति प्रापयति शिवमिति वीरः, यदिवा —ईरगतावित्यदादिको धातुः. विशेषेण अपुनर्भावेन इत्ते यातीति वीरः, तं वीरं श्रीवर्धमानस्वामिनमित्यर्थः. किंविशिष्टं वीरं? देवं, दिव्यति केवलज्ञानश्रिया दीप्यत

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

इति देवः, एतेन जगवतो ज्ञानातिशयः सूचयांचक्रे. अथवा दीव्यति क्रीडति परमानंदपदे विल-सतीति देवस्तं देवं, दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिकांतिगतिमोदमदस्वप्नेषु, जयेच्छा विजि-गीषा, व्यवहारः क्रयादिः, पचनंदिग्रहादेरयुणिनि द्वंद्वांते श्रूयमाणं पदं प्रत्येकमजिसंबध्यते, इति वचनात्. पचादेः अ, नंद्यादेर्यु, ग्रहादेर्णिनि, इत्येते प्रत्यया जवंति, ते च के इत्याकांक्षायामाह— वद, देव, पच, सेव, वप, तप, नंद, जष, प्लव, चर, मर, नर, हार, वेद, सेध, क्रोध, कोप, नर्त, व्रण, सर्प, स-र, स्वप, इत्यादि पचादयः. नंदन, वसन, मदन, दूषण, साधन, शोजन, रोचन, तपन, जल्पन, दर्पण, हर्ष-ण, अर्दन, यवन, लवण, इत्यादि नंद्यादयः. ग्राही, विरावी, उदासी, उद्भासी, स्थायी, यायी, समा-दी, वादी, परिज्ञावी, निश्रावी, निवासी, इत्यादि ग्रहादय इति. अत्र पचादित्वात् अ प्रत्ययः, गुणः देवमिति. अग्रे वदि अजिवादनस्तुत्योः, इदित इति मुमागमः, ज्वादित्वादप्, कर्तरि अके, वंदे, कथं? नित्यं, क्रियाविशेषणमेतत्, नियतं जवं नित्यं सततं, नित्यानवरताजस्रा। सततश्रांता निसंततं ॥ इति हैमकोशः. यदिवा नित्यमिति जगवद्विशेषणमपि जवति, प्राप्तकेवलजावाविरहेण शाश्वतमिति द्वितीयैकवचनांतं. ॥ इति प्रथमवृत्तार्थः ॥ १ ॥ अथ द्वितीयाधिकारे सर्वजिनस्तु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तिमाह—

॥ मूलम् ॥—जैनाः पादा युष्मान् पांतु ॥ २ ॥ व्याख्या—' जैना इति ' भो भव्याः! जैनाः पादा युष्मान् पांतु रक्षंतु. इति क्रियासंटंकः कर्त्रुक्तिः—पद्यंते गम्यंते इति पादाश्चरणाः, चरणः क्रमणः पाद इति हैमकोशः. प्रथमाबहुवचनांतं पदमेतत्, पद गतौ, ऊणादिकोण् प्रत्ययः, प्सित्वादत उपधायाः, इत्यनेन वृद्धिः, पादा इति सिद्धं. अग्रे पा रक्षणे, आशीः प्रेरणा प्रथमपुरुषबहुवचनं, अंतु योगे पांतु इति सिद्धं. कान्? युष्मान् भवतः. युष्मत्शब्दस्य द्वितीयाबहुवचनं शस्त्यदादेष्टेरः स्यादावित्यनेन सूत्रेण युष्मच्छब्दस्य टेरकारः, वाच्यलिंगत्वात्सोनः पुंस इति सूत्रेण शसः, सकारस्य नकारो न भवति, तेन विशेषमाह, शसो नो वक्तव्यः शसः. सकारस्य नकारो भवतीत्यर्थः, युष्मदस्मदोरि ति शेषः, शशीति दीर्घत्वे युष्मान् इति. पादाः किंविशिष्टाः? जैनाः, क्रोधमानमायालोभविषादेर्ष्यापरीषहेंद्रियोपसर्गाष्टकर्मप्रमादमनादिदोषजेतृत्वाज्जिनः, अर्हन्, अर्हन् जिनः पारगतस्त्रिकालविदिति हैमकोश. अनेनापायापगमातिशयो ज्ञापितः. यद्वा जयति हरिहरादीन् देवाधिदेवत्वेन ज्ञानादिलक्ष्म्या तीर्थकरलक्ष्म्या वा देवत्वख्यापकानिति जिनः, जिनानामिमे जैनास्तीर्थंकरसंबंधिनः. जि

P.P. Ac. Gunratnasuri M.S.                                                                 Jun Gun Aaradhak Trust

जये. जि धातुर्भ्वादिः, ऊणादिको नक् प्रत्ययः. जिन, अग्रे देवतेदमर्थे. इति अण्प्रत्ययः. णित्वाद् वृद्धिः, यस्य लोपः, जैन, प्रथमाबहुवचनं जैना इति ॥ २ ॥ इति द्वितीयवृत्तार्थः ॥ अथ तृतीयाधिकारे सिद्धांतस्तुतिमाह—

॥ मूलम् ॥—जैनं वाक्यं भूयाद् भूत्यै ॥ ३ ॥ व्याख्या—' जैनं वाक्यमिति ' जैनं वाक्यं भूत्यै भूयाद्भवतु. इत्यन्वयसंप्रयोगः. कर्त्रुक्तिः—उच्यते इति वाक्यं. पदसमुदायः सविशेषणमाख्यातं वाक्यमिति हैमकोशः, वच परिभाषणे, ऋहसांताघ्यण् इति घ्यण् प्रत्ययः. घित्वाच्चोः इति सूत्रेण चस्य कत्वं, ञित्वादत उपधाया इति वृद्धिः, वाक्यमिति, प्रथमाप्रथमवचनांतं क्लीबे वाक्यं. किंविशिष्टं? जैनं, जयति रागद्वेषमोहारीन् पराभवतीति जिनः, जिनस्य केवलिन इदं जैनं. तच्च द्वादशांगीरूपमर्थतस्तीर्थकरैर्निर्दिष्टं, सूत्रतस्तु गणभृद्भिर्निबद्धं. यदावश्यकनिर्युक्तौ–अत्थं भासइ अरहा । सुत्तं गंथंति गणहरा निउणं ॥ सासणस्स हियट्ठाए । तओ सुत्तं पवत्तइ ।१। इति. अस्य प्रक्रिया पूर्ववत्, भू सत्तायामिति भूधातुः, भ्वादिः परस्मैपदी, अब विकरणः, अग्रे आशिषि प्रथमवचनं यात्. किंत्वाद्गुणाभावः, भूयादिति सिद्धं, अकर्मकोऽयं धातुः, तल्लक्षणं चेदं—ये कर्मनिरपेक्षां

क्रियामाहुस्ते अकर्मकाः, ये धातवः कर्मनिरपेक्षां कर्मव्यापाररहितां क्रियां कथयंति ते धातवोऽकर्मका उच्यंते, तानेव कांश्चित् श्लोकेनाह, यदुक्तं—लज्जासत्तास्थितिजागरणं । वृद्धिक्षयभयजीवितमरणं ॥ शयनक्रीडारुचिदीप्त्यर्था । धातव एते कर्मविहीनाः ॥ १ ॥ एतदर्थलेशो यथा —ह्री लज्जायां, ओलस्जी व्रीडायां, त्रपु लज्जायां, भू सत्तायां, अस् भुवि, विद् सत्तायां, ष्ठा गतिनिवृत्तौ. जागृ निद्राक्षये, एध् वृद्धौ, क्षि क्षये, भी भये, जीव् प्राणधारणे, मृङ् प्राणत्यागे, शीङ् स्वप्ने, दिवु क्रीडायां, रुचि दीप्तौ, द्युति दीप्तौ, इत्याद्या धातवः कर्मापेक्षया रहितां क्रियामाहुरित्यकर्मकाः, यथा—देवदत्तेन लज्ज्यते, शूद्रेण शय्यते, भूयते, भवतेत्यादि. पुनरप्यत्रैव क्रियातोऽप्यकर्मकानाह—भू एध् आस शीङ् प्रभृतयः. सत्ताशुद्धिसमृद्धिवृद्धिशयनस्थानासने भासने । लज्जाजीवनरोदने च दहने नृत्ये प्रलापे क्रुधि ॥ संतुष्टौ रुचिशोकदोषमरणस्पर्धाविहारेषु च । ज्ञेयो धातुरकर्मको वयमदोन्मादप्रमादेषु च ॥ १ ॥ इत्युक्तत्वात. कस्यै? भूत्यै, भवनं भूतिः, लक्ष्म्यादिसंपत्तिस्तस्यै भूत्यै संपदे. ऋद्धिर्विभूतिः संपत्तिरिति हैमकोशः. भू सत्तायां, स्त्रियां क्तिः, क्तिवादत्वापि गुणाभावः, तस्मात् कृत्तद्धितसमासाश्चेति नामसंज्ञायां स्यादिविभक्तिः, भूत्यै इति सिद्धं, अ

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्र तादर्थ्ये चतुर्थी. ॥ ३ ॥ इति तृतीयवृत्तार्थः ॥ अथ वैयावृत्यकरदेवीस्मृत्यर्थं चतुर्थाधिकारे चतुर्थीं स्तुतिमाह—

॥ मूलम् ॥—शं नो देवी देयादंबा ॥४॥ व्याख्या–' शं नो देवीति ' अंबा अंबिकादेवी नः शं देयाद्ददातु. इति क्रियाकारकान्वयसंप्रयोगः. कर्त्तुक्तिः—अमति जानाति सुखं दुःखं वेति अंबा. यद्वा अमति याति वात्सल्यमिति अंबा. यद्विा ये गत्यर्थास्ते च प्राप्त्यर्थाः, अमति पुण्यवशात्प्राप्नोति जिनस्याधिष्ठातृत्वमिति अंबा. अथवा लोकानामंबेव अंबा, जगद्वात्सल्यकतृत्वान्माता. अम द्रम हम गतौ. इति अम् धातुः, भ्वादिः परस्मैपदी, अञ् विकरणः, उणादिको ब प्रत्ययः, स्त्रीलिंगत्वादाबतः स्त्रियामिति आ प्रत्ययः, अंबा इति सिद्धं. अंबा किंविशिष्टा? देवी, दीव्यतीति कर्तृव्युत्पत्त्या देवः, अथवा दीप्यते विश्वमनेनेति करणव्युत्पत्त्या देवः, अत्रयत्रापि दिव् धातुः, दीव्यति स्वेछया क्रीडतीति देवी. को भावः?सर्ववर्यधर्मकार्यकरणधुर्या इत्यर्थः, दिवु क्रीडा ज्येछा इति दिव् धातुः, मदां अः, अनेन अ प्रत्ययः, लघोरूपधाया गुणः, स्त्रियां नदादित्वान्नदादेरिति ईप्प्रत्ययः, यस्य लोपः, देवीति सिद्धं. किं? शं, शमयत्युपशमयत्यर्थादसातमिति शं, शं सु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

खे बलवत्सुष्टु इति हैमकोशः. शम दम उपशमे, शम् धातुः, भ्वादिः,दिवादिश्च उणादिको म्म् प्रत्ययः, अग्रे प्रथमैकवचनं, अव्ययाद्विभक्तेर्लुक्, शमित्यव्ययं जातं. केषां? नः, अस्माकं, अस्मत्-षष्ठीबहुवचनं, पश्चात्षष्ठीचतुर्थीद्वितीयाभिस्ते मे वांनौ वसन् सौ इति सूत्रेणास्मच्छब्दस्य षष्ठीबहुवचनेन सह नसादेशः, नः इति. अग्रे डुदाञ् दाने, दा धातुः, अदादिः, उभयपदी, लुग् विकरणः. आशिषि यात्, दादेरे देयादिति सिद्धं. इति चतुर्थवृत्तार्थः ॥ ४ ॥

अथ ग्रंथप्रशस्तिः—श्रीमत्तपगणगगना—गणप्रकाशैकनव्यगगनमणेः ॥ निजबुद्धिनिर्जितसुरा-चार्यस्य जगत्प्रतीतस्य ॥१॥ सद्गुरुगौतमगणधर—समानमहिमानिधानसूरिमणेः ॥ कलकीर्तिकुसुममाला—वासितभुवनत्रितयभूमेः ।२। श्रीविजयानंदगुरोः । शिष्यभुजिष्येण हंसविजयेन ॥ श्रीवीरस्तुतिवृत्ति—र्विहिता गणिभानुविजयकृते ॥३॥ त्रिभिर्विशेषकं ॥ देवमुनींदुप्रमिते (१७२४) वर्षे श्रीराजि राजनगरवरे ॥ माधवधवलदशम्यां । भेजे संपूर्णतामेषां ॥४॥ श्रिमद्गुरूणां प्रवरप्रसादात् । सदर्थमुक्तावलिशोभमाना ॥ विदर्भिता वृत्तिसुमालिकेयं । मेधाविनां कंठमलंकरोतु ॥ ५ ॥

॥ इति श्रीमहावीरजिनराजस्तुतिवृत्तिः संपूर्णा ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ अथ समसंस्कृतप्राकृतं श्री वीरजिनस्तोत्रं सटीकं प्रारभ्यते ॥

( मूलकर्त्ता—श्रीजिनवल्लभसूरिः. टीकाकार—श्रीजयसागरउपाध्यायः )

॥ मूलम् ॥—भावारिवारणनिवारणदारुणोरु—कंठीरवं मलयमंदरसारधीरं ॥ वीरं नुवामि कलिकालकलंकपंक—संभारसंहरणतुंगतरंगतोयं ॥ १ ॥ व्याख्या—श्रेयार्थं श्रीमहावीरं । प्रणम्य परमेश्वरं ॥ जिनवल्लभसूरींद्र—कृतो व्याख्यायते स्तवः ॥ १ ॥ तद्यथा—भावारयः क्रोधादयः कषायाः, त एव विवेकद्रुमोन्मूलनाद्वारणा हस्तिनः, तेषां निवारणं नितांतमपासनं. तत्र दारुणोरुश्चासौ कंठीरवश्च दारुणोरुकंठीरवो रौद्रमहासिंहः, स इव यस्तं भावारिवारणनिवारणदारुणोरुकंठीरवं. मलयमंदरौ मलयाचलसुराचलौ, तयोः सारो मध्यं, तद्वद्धीरः परीषहोपसर्गवात्यादिभिर्निःप्रकंपस्तं मलयमंदरसारधीरं. तथा कलिकाले ये कलंका असद्दोषारोपास्त एव जीवशरीरमालिन्यापादनात्पंकसंभारः कर्दमचयः, तस्य संहरणं पराकरणं, तत्र तुंगतरंगं प्रोच्छ्रितकल्लोलं यत्तोयं नीरं तदिव यः सः, तं कलिकालकलंकपंकसंभारसंहरणतुंगतरंगतोयं. विशेष्यपदक्रियापदयोरत्र योगादीदृशं वीरं वर्धमानस्वामिनं नुवामि स्तवीमि, सद्भूतगुणोत्कीर्तनेन संभावयामीत्यत्र पद्यार्थः ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ १ ॥ तत्र भगवतो महिमव्यावर्णने किलात्मनः शक्तिमसंभावयन् युक्तिमाह—

॥ मूलम् ॥—बाढं विसारिगरिमा महिमा तवेह । बुद्धो न देवगुरुणा न पुरंदरेण ॥ तं कोऽवगंतुमखिलं जडिमालयोह—मुंभामि किंतु तव देव गुणाणुमेव ॥ २ ॥ व्याख्या—हे नाथ! बाढं अत्यर्थं सामस्त्येनेत्यर्थः, विसारी प्रसरणशीलो गरिमा प्रौढिर्यस्य स विसारिगरिमा, ईदृक्तव महिमा माहात्म्यं, किमित्याह—इह जगति न नैव देवगुरुणा बृहस्पतिना बुद्धो ज्ञातः, न च पुरंदरेण शक्रेण बुद्ध इत्यनुवर्तते, उपलक्षणत्वादन्यैरपि मतिमद्भिर्न बुद्ध इति. ततस्तं त्वन्महिमानमखिलं परिपूर्णमवगंतुं ज्ञातुं जडिमालयो महाजडोऽहमित्यात्मनिर्देशः, कः कियन्मात्र इत्यर्थः. ततः किं करोमीत्याह—किंतु तथाप्यर्थे हे देव तव गुणाणुमेव ज्ञानादिगुणलवमेव उंछामि गृहीतधान्यावशिष्टकणादानमिव स्तोकं स्तोकं गृह्णामि, इत्येवमभिदधता स्तुतिकारेण स्वात्मनो निरभिमानता सूचितेत्यर्थः. ॥ २ ॥ इह गुणाणुमेवोंछामीति यदुक्तं तदेवाखिन्नेऽपि स्तवे प्रकटयिष्यन्नाह—

॥ मूलम् ॥–संतो गुणा गुणिगुरो तव हासहंस–नीहारहारधवला बहुलीभवंति ॥ ते सोमसूरहरिहीरविरंचिबुद्ध–मायाविदेवनिवहे न मलीमसा वा ॥ ३ ॥ व्याख्या–हे गुणिगुरो हे गुणवद्गुरो सं·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तो विद्यमानास्तव गुणा ज्ञानादयो रूपसौभाग्यादयो वा बहुलीभवंति प्रचुरीभवंति, तद्गुणैर्विचार्य-माणा विस्तारमापद्यंत इति. कथंभूतास्त इत्याह—हासो हास्यं, हंसो मरालः, नीहारो हिमं, हारो मुक्तावली. एषां द्वंद्वे हासहंसनीहारहारास्त इव धवलाः शुभ्राः, ते, तादृशा गुणाः किमन्यत्रापि संतीत्यत आह—' ते सोमेत्यादि ' सोमश्चंद्रः, सूरः सूर्यः, हरिर्विष्णुः, हीरो महेश्वरः, विरंचिर्ब्रह्मा, बुद्धः सुगतः, एषां द्वंद्वे सोमसूरहरिहीरविरंचिबुद्धाः, ते च ते देवलक्षणरहितत्वान्मायाविदेवाश्च सोमसूरहरिहीरविरंचिबुद्धमायाविदेवाः, तेषां निवहः समूहस्तस्मिंस्ते गुणा न नैव संतीत्यर्थः. ' म-लीमसा वेति ' वाऽथवा संति चेत्तदा ते मलीमसा मलिना मषी श्यामा इत्यर्थः, इयता दोषा ए-व देवांतरेषूक्ता भवंतीति, यतो दोषान् श्यामान् गुणान् शुभ्रान् वर्णयेदिति को विस्मयः! ततो य-था भगवति गुणास्तथा देवांतरेषु दोषा एवेति. उक्तं च वीतरागस्तवे—सर्वे सर्वात्मनान्येषु । दो-षास्त्वयि पुनर्गुणाः ॥ स्तुतिस्तवेऽयं चेन्मिथ्या । तत्प्रमाणं सभासदः ॥ १ ॥ ततो गुणाधिकतया भगवानेवाराध्य इत्यर्थः. ॥ ३ ॥

॥ मूलम् ॥—देवं भवंतमवहाय दुरंतमोह—संछन्नबुद्धिमिहिरा इह भूरिकालं ॥ संसारनीर-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निलये बहु संसरंतो । विंदंति जंतुनिवहा न हि सिद्धभावं ॥ ४ ॥ व्याख्या—हे नाथ! देवमर्ह-
द्भट्टारकं भवंतं त्वामवहाय त्यक्त्वा जंतुनिवहाः प्राणिगणाः सिद्धभावं सिद्धत्वं सिद्धिमित्यर्थः, न हि
नैव विदलाभ इत्यस्य धातोर्विंदंतीति रूपं, ततो विंदंति लभंते, किंविशिष्टास्ते? यतो दुरंतो दुर-
पोहो यो मोहो मौढ्यं तेन संछन्नोऽत्यावृतो बुद्धिमिहिरो ज्ञानसूर्यस्तदावरणाभ्रजालैर्येषां ते संछन्न-
बुद्धिमिहिराः, अत एव भूरिकालमनंतपुद्गलपरावर्तरूपं समयं, इहास्मिन् संसार एव दुःप्रापपरपार-
त्वान्नीरनिलयः, तत्र बहु यथा स्यादेवं संसरंतस्तिर्यङ्नरामरादिभावैः पर्यटंतः सिद्धभावं न हि विं-
दंतीति योजितमेवेति. तदेवं सति सद्ज्ञाना आसन्नसिद्धिका एव जीवाः प्रभुमाराध्य सिद्धिमौध
मध्यासत इति भावार्थः. ॥ ४ ॥ अथैकवाक्योक्त्या काव्यद्वयेन प्रभुं स्तुवन्नाह—

॥ मूलम् ॥—सासूयसंगमसुरोरुसमूददंभ—संरंभसंततमसंचयचंडभासं ॥ हिंमामरोरुहनमीर-
मणं चिरोढा—हंकारकंदलदलीकरणासिदंभं ॥ ५ ॥ वंदेऽहमिंदुदलभालममंदभंद—संदोहमंदिर-
वरं दरकंदकोलं ॥ गंभीरसंभवजरामरणोरुनीर—संसारसागरतरीकरणिं च वीरं ॥ ६ ॥ युग्मं ॥
व्याख्या—सह असूययाऽन्यगुणानां धैर्यस्थैर्यादीनां दुष्टताकरणेन वर्तते यः स सासूयः, स चासौ

P.P. Ac. Gunratnasuri M.S.  Jun Gun Aaradhak Trust

संगमसुरश्च, तस्य य उरुर्महान् समूढश्चिरव्यूढो दंभसंरंभः कपटाटोपः. स एव विवेकलोचनांध्यजनकत्वात्संतमसंसंचयस्तमःस्तोमः, तत्र चंडभा इव चंडभाः सहस्रकरस्तं. इदं हि विशेषणं साभिप्रायं. भगवतः किल छद्मस्थविहारेण विहरतः संगमाख्यः शक्रसामानिकोऽभव्यदेवः षण्मासीं विविधानुपसर्गांश्चकार, स्वामी पुनरसमसाहसस्तानुपक्रमयैव पराजितवानिति संप्रदायः. उक्तं च प्रस्तुतस्तुतिकारेणैव वीरस्तोत्रांतरे यथा—एग रयणीइ वीसं । छहिं मासेहिं विविहे य उवसग्गे ॥ तुहकरियहरियसुरसग्ग—संगमो संगमो जाउ ॥ १ ॥ इति. हिंसा प्राणिवधः. मृषा कुलेश्या. पंकजात्वात्सरोरुहं कमलं, तत्र तमीरमण इव चंद्र इव तं, चिरोढो बहुकालधृतो योऽहंकारो मानः. स एव मनोभूमिजातत्वात्कंदलं, नवोद्भितो वनस्पत्यवयवः, तस्य दलीकरणं भेदनं. तत्रासिदंष्ट्र इवासिदंडः खड्गपात इत्यर्थः. ॥ ५ ॥ तथा ' वंदेऽहमित्यादि ' वंदेऽहमित्येतद्वीरमित्यत्र योक्ष्यते. इंदुदलाकारं भालं यस्य स इंदुदलभालस्तं, अष्टमीचंद्राकारललाटमित्यर्थः, अत्र ' मयूरव्यंसकेत्यादि ' सूत्रेण मध्यपदस्थस्याकारशब्दस्य लोपः, एवमन्यत्रापि. अमंदानंदानां प्रौढश्रेयसां संदोहोऽमंदानंदसंदोहः, तस्याश्रयभूतत्वान्मंदिरवरमिव प्रधानगृहमिव तं. दरो भयं, स एव कंदस्तस्योत्खननयोगात्कोल इव

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कोलो वनशूकरस्तं, तथा गंभीराणि दुरवगाहानि संभवजरामरणान्येव जन्मवयोहानि प्राणवियोगा ए-
वोरुनीराणि विपुलजलानि यत्र स गंभीरसंभवजरामरणोरुनीरः, स चासौ संसार एव दुरुत्तरत्वात्सागरः सं
सारसागरस्तत्र परतीरप्रापणसाधर्म्यात्तरीकरणिनौसदृशस्तं, चकारो विशेषणसमुच्चये, वीरं चरमजिनं
वंदेऽहमिति वाक्यस्यात्र योगः. सासूयेत्यादिकाव्ययुग्मप्रतिपादितसप्तविशेषणोवर्णितं श्रीवीरं नम-
स्करोमीत्यर्थः. ।६। अथ सत्यपि विकारकारणे भगवतो भावस्य निःक्षोभतां काव्यत्रयेणाह—

॥ मूलम् ॥—उद्दामकामभरभंगुरमंगभंग—संसंगबंधुरमुरोरुहभारखिन्नं ॥ देहं सलिलपरि-
रिंखणमंजुसिंजि–मंजीरचारुचरणं सरसं वहंती ॥७॥ संगेयतालल्यचंचुरचारचारी। संचारिणी करणबं-
धकलासु सज्जा ॥ उन्नालनीररुहकोमलबाहुवल्ली । भल्लीव विद्धबहुकामिकुरंगसंघा ॥ ८ ॥ हेला-
विलोलमणिकुंभललीढगल्ला । कंकेल्लिपल्लवकरा वरकंबुकंठी ॥ केलीकलापरमणी रमणीयहावा ।
नालं निहंतुमिह ते विमलाभिसंधिं ॥ ९ ॥ त्रिभिर्विशेषकं ॥ व्याख्या—हे देव! तव विमलाभि-
संधिं निहंतुं रमणी नालं बभूवेति तृतीयवृत्तस्य द्वितीयार्थेनोक्तियुक्तिः, उद्दामकामभरेणोत्कटस्मर-
पूरेण भंगुरमिव भंगुरं मदोद्रेकविशेषान्मनागवशमिवेत्यर्थः, इवलोपोऽत्र दृष्टव्यः, एवमग्रेऽपि. उ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

द्दामकामजरभंगुरं, अंगस्य भंगो मोटनं, तस्य संसंगः संसर्गस्तस्माद्बंधुरं मनोहरं, उरोरुहभारेण पीनोन्नतस्तनभारेण खिन्नमिव खिन्नं श्रांतमुरोरुहभारखिन्नं, देहं शरीरं, सलिलं सौभाग्यगर्वाद्विशिष्टचेष्टोपेतं यत्परिरिंखणं द्रुतं विलंबितं चंक्रमणं तेन मंजुसिंजिनी मधुरशब्दवादिनी. ये मंजिरे नूपुरे ताभ्यां चारू विशेषदर्शनीयत्वान्मनोज्ञौ चरणौ यस्मिन् स तथा तं. सरसं प्रस्तावात् शृंगारादिरसोपेतं. एतादृशं देहं पूर्वोक्तं वहंती बिभ्रतीति रमणीविशेषणं. पुनरपि स्त्रीविशेषणानि ।७। तथा 'संगेयेत्यादि' तत्र तालाश्चच्चपुटचाचपुटादयः, लयो गीतनृत्यवाद्यानां साम्यावस्था, चंचुरो व्यापारनैपुण्यसुंदरः. स चासौ चारश्च प्रगल्भपदन्यासश्च चंचुरचारः, मृदु मंदपदन्यासाश्चार्यः, ताश्च संगीतकशास्त्रप्रसिद्धाः, षोडश आकाशिक्यः, षोडश च भौम्यः, एवं द्वात्रिंशच्चार्यः, ततस्तालादीनां पदानां द्वंद्वे सति संगेये संगीतके प्रेक्षणके ताललयचंचुरचारचार्यः, संगेयताललयचंचुरचारचार्यस्ताभिः संचरितुं हस्तपादाद्यभिनयपूर्वकं प्रवर्तितुं शीलमस्याः सा तथा, तथा करणान्यष्टोत्तरशतसंख्यानि, बंधो मयूरबंधादिः, कलाः स्त्रीजनोचिताश्चतुःषष्टिः, ततः कृतद्वंद्वासु करणबंधकलासु विषये यथावसरं तत्तद्व्यापारविधाने सज्जा सावधाना दक्षेति यावत्. उन्नालमूर्धस्थितनालं यन्नीररुहं नलिनं तद्वत्कोमले सरलना-

महा- स्तुति- १६

दिधर्मसाम्यान्मनोज्ञे बाहुवल्ल्यौ भुजलते यस्याः सा तथा. तथा नल्लीव इवशब्दस्य तुल्यार्थवाच-कत्वात्प्रहरणविशेषतुल्येत्यर्थः, कुत इत्याह—यतो विद्धबहुकामिकुरंगसंघा. विद्धस्तीक्ष्णकटाक्षक्षेपेणांतर्भेदितः, बहुकामिन एव चटुलस्वभावत्वात्कुरंगसंघो हरिणयूथं यया रमणीनल्ल्या सा तथा. अत्रोपमानोपमेयभावना सुकरैव. ॥ ८ ॥

'हेलाविलोलेत्यादि' हेलया संभ्रमविशेषेण ये विलोले मणिकुंडले रत्नकुंडले. अन एवान्यां लीढौ श्लिष्टौ गल्लौ कपोलौ यस्याः सा तथा. कंकेल्लिपल्लवोऽशोककिशलयं. तद्वन्मृदु शोणौ करौ पाणी यस्याः सा तथा, वरकंबुः प्रधानशंखस्तद्वत् त्रिरेखताशब्दमाधुर्यादिगुणोपेतः कंठो गलो यस्याः सा तथा. केलीललामेति केली लीलेत्येकोऽर्थः, ततः केलीकेलीमत्योरभेदोपचारात्केलीति केलीमतीति स्त्रीनाम. ततश्च केलीनां केलीमतीनां लीलावतीनां कामिनीनां ललाममिव भूषणमिव केलीललाम. अत्र नपुंसकत्वात्सेर्लोपः, आविष्टलिंगत्वान्न लिंगभेदः. तथा रमणीयः कामिजनव्यामोहकत्वेन कमनीयो हावो मुखविकारः, उपलक्षणत्वाद्विलासविभ्रमबिब्बोकविशेषभावादयोऽपि यस्याः सा रमणीयहावा. हावादीनां चेदं स्वरूपं—हावो मुखविकारः स्या—द्भावश्चित्तसमुद्भवः ॥ विलासो नेत्रजो ज्ञेयो । विभ्रमो

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

चूसमुद्भवः ॥ १ ॥ इष्टानामर्थानां । प्राप्तावभिमानगर्वसंभूतः ॥ स्त्रीणामनादरकृतो । बिब्बोको ना म विज्ञेयः ॥ २ ॥ स्थानासनगमनानां । हस्तभ्रूनेत्रकर्मणां चैव ॥ उत्पद्यते विशेषो । यः श्लिष्टो ऽसौ विशेषः स्यात् ॥ ३ ॥ इत्युक्तदशविशेषणविशिष्टा रमणी ललना. जातिनिर्देशादेकवचनं. ते तव विमलाभिसंधिं, विमलो विकारकारणप्रत्यासन्नत्वेऽपि विकारमलरहितो योऽभिसंधिश्चित्तभावस्तं. अथवा विमलेति भगवतः संबोधनं मंतव्यं. किमित्याह—निहंतुं पातयितुमन्यथा कर्तुमिति याव त्. इह जगति नालं न समर्थोऽभूत. ततो यदेवंविधापि ललना तवानुपमब्रह्मधारिणोऽभिसंधिं न विसूत्रितवती तेन सविशेषं त्वमाराध्यो ध्येयोऽस्तीति भावः. ॥ त्रिभिर्विशेषकं ॥ इत्येकवाक्ये नैव काव्यत्रयार्थोपनिबंधज्ञापकमित्यर्थः. ॥ ७ ॥

॥ मूलम् ॥—संचारिकिन्नरगणारववेणुवीणा—संरावभिन्नकलगेयरवाभिरामा ॥ आकालता विकुगुरुहकुधीकुदेव—संबंधबुद्धिहरणी तव देव वाणी ॥ ॥ १० ॥ व्याख्या—संचारी भ्रमणशील नाशीलः. किन्नरगणारवो व्यंतरगणविशेषोपपादितध्वनिर्यत्र स संचारिकिन्नरगणारवः. तादृशो यो वेणुवीणासंरावः किन्नरगणसंभावित एव वंशविपंचीशब्दस्तेन भिन्नो मिश्रितः. कलगेयरवो रतगा

यनकृतो मंद्रगीतनादस्तेनापि माधुर्याद्यतिशयविशेषेण सकलसुरनरादिश्रोतृजनचित्तावर्जकत्वादभि-रामा रमणीया. एतदर्थसंवादी चायं श्लोकः—मालवकैशिकीमुख्य—ग्रामरागपवित्रितः ॥ तव दि-व्यो ध्वनिः पीतो । हर्षोद्ग्रीवैर्मृगैरपि ॥ १ ॥ 'आकालेति' आकालभाविन्यनंतकालभाविनी या कुगुरूहकुधियां कुदेवे च संबंधबुद्धिरभिनिवेशादत्यासक्तिः, तस्या हरणी तन्निवारिणीत्यर्थ. तत्र कुगुरौ प्रतीते गुरुत्वबुद्ध्योहनं वितर्कणमूहो विचारणमित्यर्थः, कुगुरूहः, अन्यथा स्थिते धर्मतत्वेऽ-न्यथावधारणं. कुधीर्दुरभिसंधिरिति. कुदेवो भगवद्विलक्षणः प्रतीत एवेति. तदीदृशी हे देव! तव वाणी देशनावाग्मम प्रमाणमिति गम्यत इत्यर्थः. ॥ १० ॥

॥ मूलम् ॥—संदेहदावजलवाहमजीवजीव—भावावभासतरणिं भवसिंधुनावं ॥ आगामि-केवलरमातरुणीविवाहा । देवागमं तव नरा विरला महंति ॥ ११ ॥ व्याख्या—संदेह एव निश्चि-तार्थतत्ववनदाहकत्वाद्दावो दवाग्निः, तत्र जलवाह इव जलद इव तं, अजीवजीवयोर्भावयोः पदा-र्थयोरुपलक्षणत्वात्पुण्यपापादिशेषतत्वानामप्यवभासो यथावत्प्रकाशनं, तत्र तरणिरिव तरणिः. सूर्य-स्तं. भव एव दुःखजलबहुलत्वात्सिंधुर्जलधिः, तत्र नौरिव नौस्तरणिस्तं, हे देव! तवागमं द्वादशां-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

महा-
स्तुति-
१७

गाख्यं प्रवचनं. किमित्याह—आगामी आसन्नजावी केवलरमातरुण्याः केवलश्रीयुवत्या विवाहो ल-
क्षणया संगमो येषां ते आगामिकेवलरमातरुणीविवाहा नरा जव्यपुरुषा विरलाः केचिदेव महं-
ति द्रव्यतो जावतश्चाज्यर्चयंति, विरलानामेव केषांचित् पचेलिमपुण्यप्राग्जारवशात् त्वन्महनप्राप्ते-
रित्यर्थः. ॥ ११ ॥

॥ मूलम् ॥—देवा महापरिमलं तरलालिजाल—ऊंकारहारि तव वीर सजासु जूरि ॥ फु-
ल्लारविंदनवसुंदरसिंडुवार—मंदारकुंदकबरं कुसुमं किरंति ॥ १२ ॥ व्याख्या—हे वीर! तव सजासु
देवाः कुसुमं किरंतीत्यन्वयः, तत्कीदृशं कुसुमं? महापरिमलमत्यंतसुरजि. तरलं स्वजावादेव चटुलं
यदलिजालं मधुकरकुलं. तस्य ऊंकारै रावविशेषैर्हारि मनोज्ञं तव वीरेति संबोधनं. जूरि प्रचुरं जा-
नुदघ्नमित्यर्थः, फुल्लारविंदानि विकस्वरसरोरुहाणि, नवसुंदरसिंडुवाराणि प्रत्यग्रनिर्गुंडीपुष्पाणि, मंद-
राणि देवडुमप्रसूनानि, कुंदानि प्रसिद्धानि, तत एषां द्वंद्वे फुल्लारविंदनवसुंदरसिंदुवारमंदारकुंदानि,
तैः कबरं मिश्रं. जिन्नक्रमस्य देवा इति पदस्येह योगस्तेन देवा व्यंतरसुरास्तव जवतः सभासु स-
मवसरणाज्यंतरप्राकारे विदिग्वर्तमानासु द्वादशसंख्यासु पर्षत्सु कुसुमं पंचवर्णं पुष्पं एकत्वं जात्यापे-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

च्छया किरंति विक्षिपंति सर्वतो विस्तारयंतीत्यर्थः. अत्राह—ननु समवसरणं योजनप्रमाणं प्रत्यपादि, तावत्प्रमाणश्च पुष्पोत्करः खल्वागमे गीयते, भवद्भिस्तु षड्विंशतिधनुःशतमात्रविस्तारप्रथमप्राकारे मध्यस्थितासु सभास्वेव कुसुमप्रकरो वर्णितस्तत्कथं संगच्छते? सत्यं, सौम्यं तदेतत्स्तुतिपरं वचनं. तेन तदन्यत्र द्वितीयतृतीयप्राकारयोरप्युपलक्षणत्वात्स उक्तो द्रष्टव्य इति. सभासु कुसुमं किरंतीति यदुक्तं तत्संगतमेवेति. तदियता भगवतः पूजातिशयोंशतोऽभिहितो भवतीत्यर्थः. ॥ १२ ॥

॥ मूलम् ॥—निस्सीमभीमभवसंभवरूढगूढ—संमोहमूढवलयदारणसारसीरं ॥ वीरं कुवासमसहारसुवारिपूर—मुत्तुंगमारकरिकेसरिणं नमामि ॥ १३ ॥ व्याख्या—निःसीमभीमभवेऽत्यंतरौद्रसंसारे संभवा उत्पत्तयस्तेषु रूढो जातो गूढो गुपिलो यः संमोहः स एव दृढस्थितिकत्वाद् मूढवलयं. तद्दारणे सारसीर इव सारसीरस्तं. तथा कुवासः कदाग्रहः, स एव परित्यागार्हत्वान्मूलस्तस्य हारः स्फेटनं. तत्र सुवारिपूर इव सुवारिपूरस्तं, उत्तुंगमारः प्रचंडःस्मरः, स एव दुर्धर्षत्वभावत्वात्करिकुंजरः. तत्र केसरीव केसरी तं, वीरमित्यस्येह योगः, श्रीवर्धमानस्वामिनं नमामि नमस्करोमि. भगवन्नमस्कारो हि महाफलः. यदार्षं—इक्कोवि नमुक्कारो । जिणवरवसहस्स वद्धमाणस्स ॥ संसारसागराओ ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तारेइ नरं व नारिं व ॥ १ ॥ इति काव्यार्थः. ॥ १३ ॥

॥ मूलम् ॥—भिंदंतमंतरणकारणमंतरायं । संरुद्धरोगसमवायमलोनमायं ॥ तच्छिन्नमोहतिमि-रावरणावसायं । वीरं नमामि नवहेमसमिद्धकायं ॥ १४ ॥ व्याख्या!—अंतरणं यथेप्सितदानलान भोगोपभोगवीर्याणां व्यवधानं प्रतिबंधकत्वमित्यर्थः, तस्य कारणमंतरणकारणं यदंतरायं घातिकर्म चतुर्थं कर्म तद्भिंदंतं क्षयं नयंतं संरुद्धरोगसमवायं निषिद्धामयसमूहं. अलोनमायं लोनमायावित्र-र्जितं. तथा उच्छिन्नं सर्वथा छेदं नीतं, मोह एव सन्मार्गप्रवृत्तिनिवारकत्वात्तिमिरं तमो येन सः. त-था आवरणशब्देन ज्ञानावरणदर्शनावरणाख्ये कर्मणी, ते अवसयत्यंतं प्रापयति यः स आवरणा-वसायः, तत उच्छिन्नमोहतिमिरश्चासावावरणावसायश्चेति विशेषणसमासे उच्छिन्नमोहतिमिरावरणा वसायस्तं. नवहेमवत्समिद्धो दीप्तिमान् कायो यस्य स तं, ईदृशं वीरं नमस्यामीति काव्यार्थः ॥१४॥

॥ मूलम् ॥—वंदारुवासवसुरासुरनासुरालं—कारामलद्धविपरागसमुद्धराणि ॥ सेवामि ते च-रणवारिरुहाणि भूरि—संदेहरेणुहरणोरुसमीर वीर ॥ १५ ॥ व्याख्या—हे भूरिसंदेहरेणुहरणोरु समीरेति स्पष्टं. हे वीर इत्येवं त्वां संबोध्य किं करोमीत्याह—‘ वंदारुवेति ’ वंदारवः. सप्रणयप्रण-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मनप्रवणा ये वासवसुरासुराः पुरंदरदेवदानवाः, तेषां ये जासुरालंकाराः शिरःस्थदीप्तभूषणानि, त-
त्संबंधिन्यो या अमलछवयो निर्मलरुचयस्ता एव सुदूरप्रसरणात्परागो मकरंदस्तैः समुद्धराणि समु-
न्नतानि परजागविशेषं प्राप्तानीत्यर्थः, एवंविधानि ते तव चरणवारिरुहाणि पदपद्मानि सेवामि शि
रोनमनादिनाश्रयामि, सेवामीति परस्मैपदं, आत्मनेपदमनित्यमिति वचनाददुष्टमित्यर्थः. ॥ १५ ॥

॥ मूलम् ॥—अंचामि ते चरणतामरसालिलीला—संधायिपंचममहागणधारिवाणी ॥ संबुद्ध-
बुद्धिकरुणालयलिंगसिद्ध—संघावलीदमिगणं चरणं चरंतं ॥ १६ ॥ व्याख्या—' चरणेत्यादि '
चरणतामरसयोः पदांबुजयोरलिलीलासंधायी भृंगशोजाधारी यः पंचममहागणधारी सुधर्माख्यगण-
धरस्तस्य वाणी देशना गीस्तया संबुद्धः प्राप्तप्रतिबोधः, तादृशो यो बुद्धिकरुणालयो मतिकृपाश्रयो
लिंगसिद्धो रजोहरणादिलिंगधारणप्रतीतः, संघावल्यां चतुर्वर्णसंघपरंपरायां दमिगणः साधुगच्छः सं-
घावलीदमिगणस्तं, तथाविशिष्टदमिगणं तं, पुनश्चरणं चारित्रं चरंतमासेवमानं, अंचामि ते इत्य-
स्येह योगः, ततस्ते तव संबंधिनं तं द्रव्यतो भावतश्चाभ्यर्चयामीति. अत्रायं जावः—आस्तां त्वद-
भ्यर्चनं, किंतु त्वयि जक्त्यतिरेकात्त्वदीयं विशिष्टप्रधानशिष्यगणमप्यहमंचामि. इह समाप्तमिव पू-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

र्वार्धे कुर्यादर्थप्रकाशनमिति कविसमयमुल्लंघ्य पदचतुष्टयेऽपि संलग्नस्यैव समासस्य करणाद्दोषशंका न करणीया. महाकविप्रबंधेषु क्वचित्तथा दर्शनात्, यथा—पुरः सुरतसंरंभ—रसद्विगुणितच्छवि ॥ पार्वतीवदनालोक—लालसः पश्य शंकर ॥ १ ॥ इति काव्यार्थः. ॥ १६ ॥

॥ मूलम् ॥—उच्चंडधारकरवालकरारिवार—विच्छिन्नकुंभगलनालकरालनागे ॥ कुंतासितोमरविभिन्नपरासुदेहे । कंकालसंकुलभयावहभूमिभागे ॥ १७ ॥ सावेगहुंकरणमामरमुंडरुंड—कीलाललालसविहंगकुलावरुद्धे ॥ आबद्धबाणविसरे सहसा नुवंतो । वीरं नरा रणभरेऽखिलं जयंति ॥ ॥ १८ ॥ युगलकं ॥ व्याख्या—इह पूर्वं रणविशेषणानि वाच्यानि, तदनु रिपुराज्यो वक्तव्यः, तत्र उच्चंडातितीक्ष्णा धारा अग्रभागो येषां ते उच्चंडधारास्ते तादृशाः करवालाः कृपाणाः करेषु पाणिषु येषां ते. तथा ते च ते अरिवाराश्च प्रतिपक्षसमूहास्तैर्विच्छिन्नानि द्विधा कृतानि कुंभगलनालानि कुंभस्थलकंठनालानि येषां ते तादृशाः, अत एव करालाः रौद्रदर्शना नागा गजा यत्र स तथा तस्मिन्, कुंता भल्लाः, असयः खड्गाः, तोमराः शस्त्रविशेषाः, एतैर्विभिन्ना विदारिताः परासुदेहा मृतद्विपदचतुष्पदशरीरा यत्र स तथा तस्मिन्, कंकालसंकुलोऽस्थिपंजरव्याप्तः, अत एव भयावहो

भयानको भूमिभागो रणक्षेत्रं यत्र स तथा तस्मिन्. ॥ १७ ॥

तथा 'सावेगेत्यादि' सावेगं सोत्तालं यद् हुंकरणभामरं हुंकारशब्दाडंबरो येषां ते सावेगहुंकरणभामरास्ते, तादृशा ये मुंडरुंडाः शिरःकबंधास्तेषां कीलाले रुधिरे लालसानि लंपटानि यानि विहंगकुलानि गृध्रादिपक्षिजातानि, तैरवरुद्धे व्याप्ते आबद्धः श्रेणिरचनां प्राप्तो योधप्रतियोधभिः समकालमुक्तो बाणविसरः शरनिकरो यत्र स तथा तस्मिन्. एवं पंचविशेषणीविशिष्टे रणभरे संग्राममपूरे वीरं चरमजिनं नुवंतो दृढध्यानपूर्वं स्तुवंतो नराः शूरपुरुषाः सहसा कालक्षेपं विनाखिलं विपक्षसैन्यं जयंत्यभिभवंति पराङ्मुखीकुर्वंतीति. तदिदमापन्नं—यदैहलौकिकजयार्थिनापि भगवानेव स्तोतव्य इति काव्ययुगलकार्थः. ॥ १८ ॥

॥ मूलम् ॥—आसन्नसिद्धिकमलापरिरंभलंभं । दंभोलिपाणिमिव मोहगिरिं किरंतं ॥ संपत्तिकारणममंगलमूलकीलं । सेवंति के न भगवंतमघं हरंतं ॥ १९ ॥ व्याख्या—आसन्नः शीघ्रभावी सिद्धिकमलाया मोक्षश्रियः परिरंभलंभः संश्लेषप्राप्तिर्यस्य स तथा तं. तथा दंभोलिपाणिमिव वज्रिणमिव मोह एव स्वभावकठीनत्वाद्गिरिः शैलस्तं, मोहगिरिं, किरंतं विक्षिपंतं नश्यंतमित्यर्थः.

P.P. Ac. Gunratnasuri M.S.  Jun Gun Aaradhak Trust

महा-
स्तुति-
२५

अत्रैतिह्यमिदं, पुरा किल पर्वताः सपक्षाः संतः पृथ्वीलोकमुपद्रोतुं प्रवृत्ताः. ततस्तदसमंजसं कथंचि द्विज्ञाय शक्रेण वज्रप्रहारतः पर्वतपक्षच्छेदमाधाय क्षोणिपीठे सौम्यं चक्रे इति हि लौकिकागमः. तथा संपत्तेरिष्टविभूतेः कारणं, अमंगलं मंगलाभावस्तदेवारत्यंकुरादिनिमित्तत्वान्मूलं. तत्र कील इव कीलः काष्ठादिकीलकस्तं, तथा अघं दुरितं हरंतं नाशयंतं भगवंतं श्रीवीरं. के? सुकृतार्थिनो न सेवंति किंतु सर्वेऽपि सेवंतीति, ततो ममाप्यसौ सुतरां सेव्य इत्यर्थः. ॥ १७ ॥

॥ मूलम् ॥—आयासभंगडमरामयसंपराय—चोरारिमारिविरहेण चिराय देव ॥ भूमंडले स नगरा निगमा विहार—चारेण ते परममुत्सवमावहंति ॥ २० ॥ व्याख्या—हे नाथ! तव विहार चारेण निगमा उत्सवमावहंतीत्युक्तियोगः, तत्र आयासः क्लेशः, भंगो देशादेर्विसंस्थुलता, डमरो विप्लवः, आमयो महातंकः, संपरायः संग्रामः. चोराः स्तेनाः, अरयः शत्रवः, मारिरशिवं. एषामाया-सादिपदानां कृतद्वंद्वानां विरहो बाहुल्येन वियोगो व्यपगमो यस्मिन् विहारचारे. तथा तेन चिराय देवेति गतार्थं, भूमंडले भरतभूवलये सनगरा नगरैः सहेत्यर्थः. निगमा बृहद्वणिक्स्थानानि. उप-लक्षणत्वाद् ग्रामाकरादयोऽपि, इह तात्स्थ्यात्तद्व्यपदेश इति न्यायात्सपादयोजनशतप्रमाणक्षेत्रमध्य-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

महा· स्तुति· २६

स्थितनिगमनगरग्रामाकरादिवर्तिनो जना आयासभंगाद्युपप्लवरहितत्वेन सुस्थिताः संतस्ते तत्र विहारचारेण, विहार ईर्यासमितिप्रधाना मुनिचर्या, तेनान्यान्यस्थानेषु चरणं गमनं विहारचारः, तेन हेतुभूतेन परमं प्रमुदितप्रक्रीडितादिभावहेतुत्वादुत्कृष्टं उत्सवं तत्कालोद्भूतप्रभूतमानसरसप्रसरसंभाविनं गीतगानदानबहुमानातोद्यनृत्यादिकुतूहलशतविधानैरुत्सवं मांगल्यकर्म आवहंत्यापादयंति सर्वादरेणाचरंतीति यावत्. तदेवं यस्य विहारोऽप्युत्सवावहस्तस्य साक्षाद्रूपदर्शनादिषु किं वाच्यमुत्सवावहत्वस्येत्यर्थः. ॥ २० ॥

॥ मूलम् ॥—निस्संगनिस्समरनिस्समनिस्सहाय—नीरागनीरमणनीरसनीरिरंस ॥ हे वीर धीरिमनिवासनिरुद्धघोर—संसारचारजयजीवसमूहबंधो ॥ २१ ॥ व्याख्या—निर्गतः संगाच्छब्दादिविषयाभिष्वंगान्निस्संगो जितेंद्रियत्वात्, निर्गतः समराद्युद्धान्निस्समरः समशत्रुमित्रविजिगीषाविवर्जितत्वात्. निर्गतः समेभ्यः स्वस्मादन्येभ्यः समानरूपादिमद्भ्यो निस्समोऽनन्यतुल्यगुणत्वात्. निर्गतः सहायेभ्यो निस्सहायः, स्वयमतुलबलत्वेन परसाहाय्यानपेक्षणात्, निर्गतो रागात्कामरागादेर्नीरागः, स्त्र्यादिष्वसंजनात्. निर्गतो रमणात्कूर्दनादेर्नीरमणः संयतविरतत्वात्, निर्गतो रसेभ्यस्त्यागार्हेभ्यः

शृंगारादिभ्यो नीरसो जितमोहत्वात्, निर्गतो रिरंसातो रामारमणेच्छातो नीरिरंसः पूर्वस्मादेव हेतोः, धीरिम्णो धैर्यस्य निवास इव धीरिमनिवासो महोपसर्गेष्वप्यक्षोभ्यत्वात्, निरुद्धो घोरसंसारचारो रौद्रभवावर्तो येनासौ निरुद्धघोरसंसारचारः, कृत्स्नकर्मक्षयेण मोक्षप्राप्तत्वात्, जीवसमूहस्य बंधुरिव बंधुर्जीवसमूहबंधुस्तदिष्टार्थसंपादकत्वात्. हे वीर इत्यस्येह योगः, जय? जयवान् भव? इह सर्वेष्वपि पदेषु संबोधनार्थास्तल्लब्धसुज्ञानेनैवेत्यर्थः. ॥ २१ ॥

॥ मूलम् ॥—उल्लासितारतरलामलहारिहारा। नारीगणा बहुविलासरसालसा मे ॥ संसारसंसरणसंभवभीनिमित्तं। चित्तं हरंति भण किं करवाणि देव ॥ २२ ॥ व्याख्या—उल्लासिनो लहलहायमानाः, तारा दीप्ताः, तरला लोलाः, अमला उज्ज्वलाः, हारिणो मनोहराः, हारा मुक्ताकलापास्ते कंठेषु येषां ते, तथा बहुर्भूयान् विलासरसः स्थानगमनादिवैशिष्ट्योल्लेखः, तत्रालसा लालसाः संसारसंसरणसंभवभियो भवपर्यटनजातभीतिर्निमित्तं कारणं. अत्राविष्टलिंगत्वान्न लिंगवचनयोर्भेदः. यथा—आकरः सर्वपापानां। न सेव्याः परयोषितः ॥ इति. एवंविधा नारीगणा इत्यस्यात्र योगात् स्त्रीसमूहा मे मम चित्तं मनो हरंति ललितलीलाकटाक्षक्षेपादिभिर्व्यामोहयंति त्वव्या-

नादन्यतो नयंति, ततो जण ब्रूहि? किंशब्दः प्रश्नार्थः, ततः किं करवाणि? किं करवै? हे देव! आदेशं देहीति भावः? यथा त्वदादेशेन दृढमना भवामीति. इह करवाणीत्यत्र विधिनिमंत्रणामंत्रणाधीष्टसंप्रश्नप्रार्थने, इत्यनेन संप्रश्नार्थे पंचमी. इति काव्यार्थः. ॥ २२ ॥

॥ मूलम् ॥—इछामहासलिलकामगुणालवालं । चिंतादलं समलचित्तमहीसमुब्भं ॥ संजोगफुल्लमिह मोहतरुं लसंतं । हे वीर सिंधुर समुध्धर मे समूलं ॥ २३ ॥ व्याख्या—इछा संबोधनाद्यभिकांक्षा, सैव मोहतरोः प्ररोहणान्महासलिलं बहुजलं यस्मिन् स इछामहासलिलः, कामगुणाः शब्दादयस्त एव मोहतरोरप्यायनादालवालं जलबंधस्थानं यत्र स तथा, तत इछामहासलिलश्चासौ कामगुणालवालश्च स तथा तं, चिंता आलजालस्मृतिः, सैव मोहतरोः शाखावल्लीभावजननाद्दलानि पत्राणि यत्र स तं, समला स्वभावान्मलाविला या चित्तमेव विषमोन्नतभावभावत्त्वान्मही मनोभूमिः, ततः समुत्तिष्टत इति समुब्भः, स्थापास्नाव: क इति कप्रत्यये समलचित्तमहीसमुब्भस्तं. संजोग एव कामकेलिरेव फुल्लानि विकसितानि पुष्पाणि यत्र स तं, इह फुल्लशब्दो विकसितार्थोऽपि विशेषणान्यथानुपपत्त्या विशेष्यपुष्पागमको ज्ञेयः, इह जन्मनि लसंतं समुत्सर्पंतं वृद्धिं यांतमि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्यर्थः, मोह एव दृढबद्धमूलत्वात्तरुर्दुमस्तं, हे वीरसिंधुर! देवार्यकुंजर! मे मम समूलं समुद्धर? मूलतोऽप्युत्पाटय? यथाहं लब्धात्मलाभः सन्निरतिशयसुखमनुभवामीत्यर्थः. ॥ २३ ॥

॥ मूलम् ॥—संपन्नसिद्धिपुरसंगममंगलाय । मायोरुवारिरुहिणीवरकुंजराय ॥ वीराय ते चरम-केवलिपुंगवाय । कामं नमो समदयादमसत्तमाय ॥ २४ ॥ व्याख्या—संपन्नं संजातं सिद्धिपुरसंगम एव मुक्तियोग एव मंगलं सर्वाभ्युदयरूपं कल्याणं यस्य स तस्मै. मायैव सपंकस्थानजातत्वादु-रुवारिरुहिणी प्रौढनलिनी, तत्र वरकुंजराय प्रधानहस्तिने. तथा केवलिनां पुंगव उत्तमः केवलिपुं-गवः, चरमश्चासौ केवलिपुंगवश्च स तथा तस्मै, तथा असमदयादमाभ्यां निस्तुल्यकरुणेंद्रियजया-भ्यां सत्तमाय प्रवराय वीराय, ते इत्यस्येह योगः, वर्धमानाय तुभ्यं कामं अत्यर्थं नमो नमस्कारो-ऽस्त्विति. अत्र नमस्योगे शक्त्यर्थेत्यनेन चतुर्थी. यतोर्हन्नमस्कारफलमित्थमूचुः श्रीभद्रबाहुस्वामिपा-दाः, यथा—अरहंतनमोक्कारो । धन्नाण भवखयं करंताणं ॥ हिययं अणुमोयंतो । विसोत्तिया वा-रज होइ ॥ १ ॥ इति काव्यार्थः. ॥ २४ ॥

॥ मूलम् ॥—हे देव किंकरमिमं परिभावयेह । मज्जंतमुत्तरजवे भवसिंधुपूरे ॥ उत्तारणाय

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कुरु वीर करावलंबं । भूयोऽसमंजसनिरंतरचारिणो मे ॥ २५ ॥ व्याख्या—हे देव! इमं मां किंकरं निदेशनिष्ठं भृत्यं परिभावय दृशावलोकय? मोपेक्षस्वेत्यर्थः, किं कुर्वंतमिममित्यत आह—उद्धर जवे उद्धतवेगे भवसिंधुपूरे संसाराब्धिप्रवाहे मज्जंतं ब्रुडंतं, एतेन परिभावनावसरः सूचितः, ततः किं कुर्वित्याह—उत्तारणाय प्रस्तावाद्भवसिंधुतस्तीरनयनाय कुरु वीर करावलंबं? हे स्वामिन्! हस्तालंबं देहीत्यर्थः, कस्येत्याह—भूयो बहु असमंजसेन लोकधर्मविरुद्धाचरणलक्षणेन कदाचरणेन निरंतरं सततं चरितुं प्रवर्तितुं शीलं यस्य स तथा तस्य, मे मम त्वत्किंकरस्येत्यर्थः, एवं सति मम भवोदधितरणात्परमपदवी न दवीयसीति काव्यार्थः. ॥ २५ ॥

॥ मूलम् ॥—कुसमयतरुमालाभंगसंहारवायो । कुनयकुवलयालीचूरणे मत्तनाग ॥ तव गुणकणगुंफे मे परीणाममिद्धं । विमलमपरिहीणं हे महावीर पाहि ॥ २६ ॥ व्याख्या—कुसमया अर्हन्मतविसंवादिनो ग्रंथास्त एव कियद्युक्तिछायामात्रधारणात्तरुमाला द्रुमाली, तस्या भंगे संहारवायुरिव संहारवायुः कल्पांतकालपवनः, नित्यानित्याद्यनेकधर्मात्मके वस्तुनि प्रतिनियतैकांशप्रतिपादनपराः कुनया दुर्नया इत्येकोऽर्थः, ततः कुनया एवानुस्यूतयुक्तिच्छुरिकया सुछेदत्वात्कुवलयालीकु-

महा-
स्तुति-
३१

मुदराजिस्तस्याश्चूरणे मर्दने समुत्पाटने मत्तनाग इव मत्तनागः, मदोत्कटगजः. तव भवतो गुणकणगुंफे गुणलवसंदर्भणे मे मम परीणामं चित्तभावं, इत्थमिति यथा चेतसि वर्तते तथेत्यर्थः, विमलं कदभिनिवेशमलनिर्गहितं, अपरिहीणं त्वद्गुणस्मरणानुप्रेक्षावशाद्वर्धमानमित्यर्थः, हे महावीर! पाहि? दुरध्यवसायोपनिपातात् त्रायस्व? यथा निरंतरं त्वद्गुणग्रंथननिरतो भवामि. इह वृत्ते संबोधनविधिर्यथास्थानं स्वयं योज्य इत्यर्थः. ॥ २६ ॥

॥ मूलम् ॥—अनयनिविडे पीडागाढे भयावहदुस्सहे । विरहविरसे लज्जापुंजे रमे भवपंजरे ॥ निरयकुहरं गामी हाहं न सिद्धिमहापुरी—सरलसरणिं सेवे मूढो गिरं तव वीर हे ॥ २७ ॥

व्याख्या—अनयैरगम्यगमनाद्युन्मार्गैर्निविडे निचिते पीडाभिर्मनःशरीरबाधाभिरागाढे विलोभिते, अत एव भयावहे दुस्सहे, तत्र कारागारादिनानाकदर्थनाशतसहस्रदर्शनाद्भयावहः, दुरंतदुःखोपनिपातानुभवनाद् दुस्सहश्च, तस्मिन्, विरह इष्टवियोगस्तेन,तस्माद्वा विरसे रुक्षप्राये, लज्जायास्त्रपाविश्वकर्मविरणजाताया व्रीडायाः पुंजे इव पुंजे राशौ, ईदृशे भव एव सुघटकष्टकाष्टमयत्वात्पंजरो भवपंजरस्तत्र रमे रतो भवामि. न पुनस्त्वद्धर्म इत्यर्थः. तत एव निरयकुहरं नरकगर्तं गमिष्यामीति णिनि प्र-

P.P. Ac. Gunratnasuri M.S.                                   Jun Gun Aaradhak Trust

त्यये गामी, अत्र एष्यहणेन इत्यनेन कर्मणि षष्ठीनिषेधः. 'हाहं नेति' हा इति खेदे, अह मित्यात्मनिर्देशे, नेति निषेधे, सिद्धिमहापुर्याः सरलसरणिरिव सरलसरणिः ऋजुमार्गस्तं, हे वीर? तव गिरं नरकद्वारार्गलीभूतां भवद्वाचं, हाहं नेत्यत्र योगः, सेवे तदुक्तार्थानामन्यथावधारणेनान्यथानुष्ठानान्नाराधयामीत्यर्थः, यतो मूढो मोहोपहतः, अथ तथा कुरु यथाहं त्वद्वचनाराधको भवामीति तात्पर्यार्थः. ॥ २७ ॥

॥ मूलम् ॥—निरीहं गंतारं परमभुवि मंतारमखिलं । निहंतारं हेलाकलिकलहकेलीहमरमं ॥ भवंतं नंतारो न हि खलु निमज्जंति भवजी—महापारावारे मरणभयकल्लोलकलिले ॥ २८ ॥

व्याख्या—निरीहं सांसारिकसुखेषु निस्पृहं, यतः परमभुवि सिद्धिशिलाख्यायां गच्छतीति तृचि गंतारं, अखिलं निरवशेषं सूक्ष्मबादरविशेषरूपतया वस्तुजातं मन्यत इत्येवंशीलो मंता. तं मंतारं सर्वज्ञमित्यर्थः, इह तृन् शीलधर्मसाधुष्विति तृन् प्रत्ययो गातृन्नुदंतेत्यादिसूत्रेण कर्मणि षष्ठीप्रनिषेधः. एवमग्रेऽपि द्रष्टव्यं. तथा हेला अवलेपात्परावधीरणा, कलिर्विवादः, कलहो भंडनादिः, केली परिहासः, हमो हास्यं, एषु हेलादिपदेषु कृतद्वंद्वेषु रसोऽभिष्वंगरूपस्तं निहंतारं तिरस्कर्तारं अनादधा-

महा-
स्तुति-
३३

नमित्यर्थः, एवं चतुर्विशेषणीविशिष्टं भवंतं त्वां नंतारो नमस्कर्तारः, किं कुर्वतीत्याह—मरणभया-न्येवोपर्युपर्युद्भवनात्कल्लोला वीचयो मरणभयकल्लोलास्तैः कलिले गहने भवभीमहापारावारे संसा-रभयमहोदधौ न हि खलु नैव निमज्जंति नरकादिनीचगतिगामिनो न भवंतीति. यदार्षं—अरिहं-तनमुक्कारो । जीवं मोएइ भवसहस्साउ ॥ भावेण कीरमाणो । होइ पुणो बोहिलाभो अ ॥१॥ इति. तस्मान्मम त्वमतितरामानमनीयोऽसीत्यर्थः. ॥ २७ ॥

॥ मूलम् ॥—एवं सेवापरहरिहयालोलचूडामणीद्ध—च्छायाच्छीढं खरकिरणभाभिन्नमंभोरुहं वा ॥ चित्तागारे चरणकमलं ते चिरं धारिणे मे । सिद्धावासं बहुभवभयारंभरीणाय देहि ॥ २८ ॥

व्याख्या—हे नाथ! मे मह्यं सिद्धावासं सिद्धिक्षेत्रं वितर देहि? कथंभूताय मह्यं? बहुभवभया-रंभरीणाय प्रभूतसंसारांतकोपक्रमखिन्नाय, पुनः किं कारिणे मह्यमित्याह—चित्तागारे मनःसद्मनि ते तव चरणकमलं पदकमलं, इह कमलशब्दः शोभावाची, तत्कर्मतापन्नं धारिणेऽवश्यं धारयमा-णायेत्यर्थः. कथंभूतचरणकमलमित्याह—‘ एवं सेवेति ’ एवं प्रस्तुतकाव्योक्तयुक्त्या सेवापरा भ-क्तिप्रह्वास्ते च ते हरिहयाश्च शक्राश्च सेवापरहरिहयास्तेषामालोलाः शिरोनमनवशादिनस्तन-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ज्वलंतो ये चूडामणयः शिरोभूषणानि, तेषामिद्धा दीप्ता छाया प्रतिबिंबः प्रतिरूपस्तया लीढं श्लिष्टं छुरितमिति यावत्, अत्रोत्प्रेक्ष्यते, एवंविधं चरणकमलं, खरकिरणभाभिन्नमंभोरुहमिव, वाशब्दस्येवार्थत्वात्, इवशब्दस्य चोत्प्रेक्षाद्योतकत्वात्, तत्र खरकिरणः सूर्यस्तस्य भासो रश्मयस्ताभिर्भिन्नं संमिलितं शोभातिशयप्राप्तं, अंभोरुहमिव पद्ममिव, तदयं भावः—यथा भास्करप्रभास्पृष्टं कमलं श्लाघ्यं स्यात्तथेंद्रशिरोरत्नभूषणच्छायाछन्नं भगवच्चरणकमलमिति. ततश्च हे देव यथोक्तविशेषणविशिष्टं, अत एव खरकिरणभाभिन्नमंभोरुहमिव तव चरणकमलं चित्तागारे धारिणे, तथा बहुभवभयारंभरीणाय मह्यं सिद्धावासं देहीति समुदायार्थः. ननु चरणकमलं धारिणे इत्येतत्कथं सिध्यतीत्युच्यते. अवश्यं धारयिष्यामिति धारी, तस्मै, अत्र णिन् चावश्यकाधमर्ण्ये इत्यनेनैष्यत्यर्थे गम्यमानावश्यकार्थे च णिन्प्रत्यये सत्येष्यदृणेन इत्यनेन सूत्रेण कर्मणि षष्ठीप्राप्तिर्निषिध्यते, वर्तमानताप्रतीतिस्तु प्रकरणवशादिति चरणकमलं धारिणे इत्यस्य सिद्धिः. इह काव्ये हरिद्वियस्य भानोरुपमानं, इंद्रभूषणच्छायायाः सूर्यभास उपमानं, भगवच्चरणकमलस्य सरोरुहमुपमानमित्युपमानोपमेयभावतयोत्प्रेक्षालंकारस्य गर्भार्थ इति काव्यार्थः. ॥ २९ ॥ ननु सिद्धावासं देहीत्यनंतरकाव्ये प्रतिपादयता

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्तुतिकारेण सर्वोत्कृष्टा प्रार्थना कृता, परं सा भगवन्निश्चलभक्त्यैव फलवतीति सांप्रतं स्तवमुपसंजिहीर्षुः शेषप्रार्थनापरिहारेण भक्तिगर्भामेव प्रार्थनामाविष्करोति—

॥ मूलम् ॥—इत्थं ते समसंस्कृतस्तवमहं प्रस्तावयामासिवा—नाशंसे जिनवीर नेंद्रपदवीं न प्राज्यराज्यश्रियं ॥ लीलाभांजि न वल्लभप्रणयिनीवृंदानि किंत्वर्थये । नाथेदं प्रथय प्रसादविशदां दृष्टिं दयालो मयि ॥ ३० ॥ व्याख्या—इत्थं पूर्वोक्तैकोनत्रिंशत्काव्यप्रतिपादितवर्णनाप्रकारेण हे जिनवीर! ते तव समसंस्कृतस्तवं संस्कृतप्राकृतशब्दैः सममेकसदृशं संस्कृतं संस्करणं समसंस्कृतं, तेन संबद्धः स्तवः प्रभुसत्कसद्भूतगुणग्रहणरूपः प्रबंधः, तमहं प्रस्तावयामासिवान्, प्रस्तावोचितशब्दार्थोपन्यासेन विरचितवान्. नन्वेवं स्तवोद्भावनेन त्वं किमिच्छसीत्याह—आशंसे इति क्रियापदं नशब्दसहितं स्थानत्रयेऽपि परिभाव्यं. यथेंद्रपदवीमिंद्रपदं नाशंसे नेच्छामि, प्राज्यराज्यश्रियं संपन्नैश्वर्यलक्ष्मीं च नाशंसे, तथा लीलाभांजि क्रीडाकुतूहलवंति वल्लभप्रणयिनीनां प्रियप्रियतमानां वृंदानि स्तोमास्तान्यपि नाशंसे, किंतु प्रार्थनांतराभ्युच्चये तदेवाह—हे नाथ! हे दयालो! कृपापर! इदं तव प्रमदप्रकटमर्थये प्रार्थनाविषयी करोमि. एतदेवाह—प्रसादविशदामनुग्रहोज्ज्वलामात्मीयां दृष्टिं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दृशं मयि भक्तिनिर्भरभावेन त्वदीयस्तवविधातरि प्रथय? प्रथां नय? विस्तारय? यथाहं तव सौम्य-दृग्विलासप्रसादवैशद्येन प्रार्थनासिद्धियोगात्कृतकृत्यो भवामीति. किंचेह लीलाभां जिनवल्लभेत्यनेन कवित्वांशेन श्लिष्टं कविना श्रीजिनवल्लभसूरीति स्वनामसूचितं सुकविनामपरिगृहीतं हि काव्यं सतामादेयं भवतीति भावार्थः. ॥ ३० ॥ इति श्रीमहावीरस्तवनं संपूर्णं. ॥

॥ इति नवांगीवृत्तिकारश्रीमदभयदेवसूरिपट्टालंकारश्रीजिनवल्लभसूरि विरचिते
भावारिवारणस्तोत्रे श्रीखरतरगच्छनायकश्रीजिनराजसूरि शिष्योपाध्याय-
श्रीजयसागरविरचिता वृत्तिः संपूर्णा. ॥ श्रीरस्तु ॥

## ॥ अथ श्रीमहावीरजिनस्तोत्रं प्रारभ्यते ॥

( मूलकर्त्ता—श्रीपादलिप्तसूरिः. टीकाकार—श्रीपुण्यसागरवाचकः )

प्रणतसुरनरालिव्रातपादारविंदं । विदितसकललोकालोकसद्ज्ञेयवृंदं ॥ सविनयमग्र नत्वा वर्धमानं जिनेशं । किमपि विरचयेऽहं तत्स्तवस्यार्थलेशं ॥ १ ॥ पूर्वं तावत् श्रीपादलिप्तसूरयोऽनेकयोगसिद्धा महांतः प्रभावकपुरुषा आसन्, तदन्वये सकलज्ञानविज्ञानविज्ञाः श्रीपुण्यतिलकसूरयो विहरंतोऽवंतीपुर्यां समेताः. तत्र च श्रीविधिपक्षगच्छाधिराजसरस्वतीलब्धप्रसादश्रीमन्महेंद्रसिंहसूरयः संति, तेषां महिमानं सकलनागरिकजननिकरवदनकमलालंकारायमानं श्रुत्वा विद्यामदध्मानचित्ताः श्रीपुण्यतिलकसूरयो वादलिप्सया श्रीगुरुसमीपमागताः, तैरुक्तं च भो मया मह वादो विधेयः. तदा श्रीगुरुभिरुक्तं? किं वृथायासेन वादेन? प्रयोजनमनुद्दिश्य मंदधियोऽपि न प्रवर्तंते. तदा श्रीपुण्यतिलकसूरिभिरुक्तं किं वृथायासः? यो यं जयति स तं शिष्यीकरोतीत्यावयोः संधा, तदा गुरुभिरंगीकृतं, प्रारब्धश्च वादः, श्रीगुरुभिर्मुहूर्तादेव ते जिताः. ततः श्रीपुण्यतिलकसूरयः स्वं धन्यं मन्यमानाः श्रीगुरून् प्रणम्य संस्तूय च शिष्या जाताः. श्रीगुरुभिरपि तेषां महत्त्वरक्षणार्थं दीक्षां दत्वा शा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

खाचार्यत्वे स्थापिताः. तत्पूर्वजानां च श्रीपादलिप्तसूरीणां विरचितमिदं वीरजिनस्तोत्रं सप्रभावं बहु-
योगसिद्धिसंपन्नं दृष्ट्वा श्रीसप्तस्मरणमहास्तोत्रेषु तृतीयमहास्तोत्रं स्थापितं, महत्त्वं चास्य स्तोत्रस्या-
नेकयोगसिद्धिमयत्वेन समहिमत्वेन च ज्ञेयं, श्रीउपसर्गहरस्तोत्रवत्, तदन्वये चाद्यापि नवीनशि-
ष्यस्य दीक्षां दत्वा प्रथममिदं स्तोत्रं पाठयंतीति. अस्य प्रथमगाथा—

॥ मूलम् ॥—जयइ नवनलिणकुवलय—वियसियसयवत्तपत्तलदलच्छो ॥ वीरोगइंदमयगल
—सुललियगइविक्कमो भयवं ॥ १ ॥ व्याख्या—वीरो जयतीत्यन्वयः, विशेषेण ईरयति गच्छति
कर्मशत्रुजयाय सन्मुखतया, कंपयति वा कर्मशत्रूनिति वीरः, ईरगतिकंपनयोः, पचाद्यच्. कर्मशत्रु-
समूहजेतृत्वाद्दर्शितपराक्रमत्वेन वीरयते इति वा वीरः. वीरविक्रांतौ, पचाद्यच्, पदैकदेशे पदसमु-
दायोपचारात् श्रीमहावीरश्चतुर्विंशतितमो जिनो जयति उत्कर्षं प्राप्नोति, जि जयेऽकर्मकोऽयं धातुः,
पंचमारकपर्यंतं यावद्विद्यमानशासनत्वेन वर्तमाने लट्. मंगलार्थं च प्रथमं जयतीति पदप्रयोगः,
नमस्कारश्चाक्षिप्तः, यथा जयतींद्रियकषायकर्मपरीषहोपसर्गादिशत्रुगणपराजयात्सर्वानप्यतिशेते उ-
त्कर्षं प्राप्नोति. इत्थं सर्वातिशायी च भगवान् प्रेक्षावतामवश्यं प्रणामार्हः, ततो जयतीति. किमुक्तं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

न्वति? तंप्रति प्रणतोऽस्मीत्यर्थः, किंविशिष्टो वीरः? नवनलिनकुवलयविकसितशतपत्रपत्तलदला-
क्षः. नवं नवीनं, यन्नलिनं सूर्यविकासिकमलं, पुनः कुवलयं चंद्रविकासिकमलं, पुनः विकसितं च
यच्छतपत्रं, शतशब्दोऽत्र बहुत्वोपलक्षकस्तेन सहस्रपत्रादेरपि परिग्रहः. अथ समासः—नलिनं च
कुवलयं च नलिनकुवलये, नवे च ते नलिनकुवलये च नवनलिनकुवलये, विकसितं तच्छतपत्रं च
विकसितशतपत्रं. नवनलिनकुवलये च विकसितशतपत्रं च नवनलिनकुवलयविकसितशतपत्राणि,
तेषां पत्तलं तीक्ष्णं यद्दलं पत्रं तद्वदक्षिणी नेत्रे यस्य स नवनलिनकुवलयविकसितशतपत्रपत्तलद-
लाक्षः. बहुव्रीहौ सक्थ्यक्ष्णोः स्वांगात्षजिति षच्, पत्तलशब्दोऽत्र तीक्ष्णवाचकः. यदुक्तं देशीनाममा-
लायां श्रीहेमसूरिभिः—' पत्तलपरुवइच्छा तह । पत्तसमिद्धं च तिक्खंमि ॥ ' तथा च तद्वृत्तिः—
पत्तलं परुवइयं पत्तसमिद्धं एते त्रयोऽपि तीक्ष्णार्थाः, पत्तलं पत्रबहुलमिति तु पत्रलशब्दभवमिति.
भगवच्चक्षुषोरहोरात्रविकासित्वादुभयोः सूर्यविकासिचंद्रविकासिकमलयोरुपमानत्वमुक्तं. पुनः किंवि-
शिष्टो वीरः? प्राकृतत्वाद्विशेषणस्य परनिपातत्वान्मदकलगजेंद्रसुललितविक्रमः, मदेन कलो मनो-
हरो मदकलो मदोत्कट इत्यर्थः, मदोत्कटो मदकल इति श्रीहेमसूरिः. एवंविधो यो गजेंद्रः सक-

लगजलक्षणोपेतत्वेन गजेषु इंदति परमैश्वर्यं भजतीति गजेंद्रः सकलगजश्रेष्टः, तद्वत् सुष्ठु अतिशयेन ललिता मनोहरा या गतिस्तया विशिष्टं क्रामति गच्छतीति मदकलगजेंद्रसुललितगतिविक्रमः. पुनः किंविशिष्टो वीरः? भगवान्, भगो ज्ञानाद्यर्थः, स नित्यमस्यास्तीति भगवान्. भगोऽर्कज्ञानमाहात्म्य—यशोवैराग्यमुक्तिषु ॥ रूपबुद्धिप्रयत्नेच्छा—श्रीधर्मैश्वर्ययोनिषु ॥ १ ॥ इति श्रीहेमसूरिः. तत्रार्कयोनिवर्जं द्वादशभगशब्दार्थयुक्त इत्यर्थः. ॥ १ ॥ अथ श्रीवीरं कविराशिषति—

॥ मूलम् ॥—अज्जवि वहइ सुतीत्थं । अखंडियं जस्स भरहवासंमि ॥ सो वद्धमाणसामी । तेल्लुक्कदिवायरो जयउ ॥ २ ॥ व्याख्या—स वर्धमानस्वामी श्रीवीरजिनो जयतु सर्वोत्कर्षेण प्रवर्ततां. किंविशिष्टो वर्धमानस्वामी? त्रैलोक्यदिवाकरः, त्रय एव लोकास्त्रैलोक्यं. चतुर्वर्णानां स्वार्थे ष्यञ् वाच्य इति ष्यञ्, स्वर्गमर्त्यपातालरूपं, तत्र दिवाकर इव दिवाकरः सूर्यः केवलज्ञानेन तस्य प्रकाशकत्वात्, त्रैलोक्यदिवाकरः, स कः? यस्य वर्धमानस्वामिनः सुतीर्थं. तीर्यते संसारार्णवोऽनेनेति तीर्थं चतुर्विधः संघः. सकलशुभगुणोपेतत्वेन शोभनं तीर्थं सुतीर्थं. अद्यापि दुःषमकालेऽपि अखंडितमविछिन्नं परतीर्थ्यादिखंडनारहितं भरतवर्षे भरतक्षेत्रे वहति. धातूनामनेकार्थत्वात्प्रवर्तत इ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्यर्थः. ॥ २ ॥ अथाभिधेयं वक्ति—

॥ मूलम् ॥—गाहाजुअलेण जिणं । मयमोहविवज्जियं जियाणंगं ॥ थोसामि तिसंघाएण । तिअसंगं महावीरं ॥ ३ ॥ व्याख्या—अहं पादलिप्तसूरिर्महावीरं जिनं त्रिसंघातेन. त्रयाणां मनोवाक्कायानां संघातः समुदायस्त्रिसंघातस्तेन त्रिकरणशुद्ध्या स्तोष्यामि स्तुतिगोचरं करिष्यामीत्यर्थः. केन? गाथायुगलेन, विपुलाचपलाद्यार्यालक्षणलक्षिता प्राकृते बहुलं गाथेत्यभिधीयते. तयोर्युगलं युग्मं तेन. किंविशिष्टं जिनं? मदमोहविवर्जितं, आनंदसंमोहयोः संगमोद्भा मत्तता मदः. मदो मुन्मोहसंभेद इति श्रीहेमसूरिः. स च जात्याद्यष्टप्रकारो मोहो मौढ्यमज्ञानमिति यावत्. मदश्च मोहश्च मदमोहौ, ताभ्यां विवर्जितो रहितस्तं. पुनः किंविशिष्टं जिनं? जितानंगं. जितः स्ववशीकृतोऽनंगः कामो येन. 'जियकसाय' मित्याधुनिकः पाठः, तत्र जिताः कषायाः क्रोधाद्या येन तं. पुनः किंविशिष्टं जिनं? तीर्णसंगं. तिर्णः पारं प्राप्तः संगः संसारानुबंध्यभिष्वंगो बाह्यांतरभेदभिन्नो येन तं. तत्र बाह्यः पुत्रकलत्रादिरूपः, आंतरश्च कर्मपुद्गलरूपः, तीर्णसंसारसमुद्रमित्यर्थः, तिसंझागं तं निस्संगमित्याधुनिकः पाठः. तत्र तमिति प्रसिद्धं, महावीरं जिनमिति योज्यं. प्रसिद्धानुभूतार्थतच्छब्दो यच्छब्दोपादा-

नं नापेक्षते, तिसंझागमिति तिस्रः संध्याः समाहृता इति त्रिसंध्यं, गोस्त्रियोरिति ह्रस्वत्वं, त्रिसंध्यं तूपवैणवमिति श्रीहेमसूरयः, त्रिसंध्यमेव त्रिसंध्यकं, स्वार्थे कन्, क्रियाविशेषणमिदं, दीर्घत्वं प्राकृतलक्षणात, निस्संगमिति, निर्गतः संगान्निस्संगस्तमित्यक्षरार्थः. अथास्यां गाथायां रूप्यसिद्धिसुवर्णसिद्ध्यादयो बह्व्यः सिद्धय उक्ताः संति, परं किंचिद्दिग्दर्शनमात्रमुच्यते—

'गाहाजुअलेणत्ति' गा इति गगनं अभ्रकं, अभ्रकं मेघाख्यं स्वच्छपत्रं गिरिजामलमिति हेमसूरयः. दीर्घत्वं च बहुत्वख्यापकं, बहुत्वं न शुभ्रादिगुणोपेतत्वेन प्राधान्यख्यापकं, तेन सिताभ्रकं न तु कृष्णमित्यर्थः. हा इति हरितालं, दीर्घत्वं पूर्ववत, जुअलमिति तारं, एतैस्त्रिभिर्युक्तं जिनं पारदं. कथंभूतं? 'मयमोहविवज्जियं जिणाणंगं' मलशिखिविषदोषत्रयापेतं, 'थोसामित्ति' स्तंभयिष्यामि, केन कृत्वा? त्रिसंघातेन, सिताभ्रकतालतारत्रयाणां योगेन, तथौषधसमवायेन जारणस्वदनविधिं करोमि. पुनः कीदृशं जिनं? तीर्णसंगं, मृतसप्तगुणसंगोत्तीर्णं महावीरमिति रूप्यं, इत्यक्षरयोजनामात्रमुक्तं, विशेषाम्नायस्तु सद्गुरोरवसेयः. ॥ ३ ॥ अथ प्रतिज्ञानमेव गाथाद्वयमाह—

॥ मूलम् ॥—सुकुमालधीरसोमा । रत्तकिसणपंडुरा सिरिनिकेया ॥ सीयं कुसगहभीरू ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जलथलनहमंडणा तिन्नि ॥ ४ ॥ न चयंति वीरलीलं । हाउं जइसुरहिमत्तपडिपुण्णा ॥ पंकयगइंदचंदा । लोयणचंकमियमुहाणं ॥ ५ ॥ युग्मं ॥ व्याख्या—तवेत्यध्याहार्यं, हे वीर! पंकजगजेंद्रचंद्राः 'तिन्निति' एते त्रयस्तव लोचनचंक्रमितमुखानां लीलां हातुं न चयंतीत्यन्वयः. पंकजं कमलं, गजेंद्रो द्विपश्रेष्ठः, चंद्रश्चंद्रमाः, एषां द्वंद्वः, पंकजगजेंद्रचंद्रास्ते तव संबंधि लोचने नेत्रे, चंक्रमितं गमनं, मुखं च वदनं. एषां द्वंद्वः, लोचनचंक्रमितमुखानि तेषां. ननु द्वंद्वश्च प्राणितूर्यसेनांगानामित्येकवदेव स्यात्तत्कथं बहुत्वं? सत्यं, अधिकरणैतावत्त्वे चेति, एते त्रयः, एतेषां त्रयाणामित्येवंरूपे द्रव्यपरिमाणावगमे नैकवद्भावः, यथा दशदंतोष्ठा इति. लीलां विलासं, हातुं अंतर्भावितण्यर्थत्वात्त्याजितुं न चयंति न शक्नुवंति, प्राकृतसूत्रेण शक्तृ शक्तौ इत्यस्य धातोः चय इत्यादेशः, न समर्था भवंतीत्यर्थः. ते कीदृशाः? यदि सुरभिमत्तप्रतिपूर्णाः, यदीति संभावनायां, सुरभि घ्राणतर्पणं पंकजं, मत्तो गर्जितो हस्ती. प्रतिपूर्णः षोडशकलावांश्चंद्रः, एषां द्वंद्वः, अहं संभावयामि, यद्येते पंकजादित्रयः सुरभिमत्तप्रतिपूर्णा भवंति, तथापि भवतो लोचनचंक्रमितमुखानां लीलां हातुं न शक्नुवंतीत्यर्थः. तव लोचनं पंकजादप्यधिकसुंदरं, तव गमनं गजेंद्रगमनादप्यधिकतरं सुंदरं,

तव मुखं संपूर्णचंद्रादप्यधिकसुंदरमित्यर्थः. एवं सर्वत्र विशेष्यविशेषणशब्दा यथासंख्यं योज्याः. पुनः कीदृशास्त्रयः? सुकुमारधीरसौम्याः, सुकुमारं कोमलं पंकजं, धीरो धैर्यवान् गजः. धीरो ज्ञे धैर्यसंयुते इति श्रीहेमसूरिः, सौम्यः कमनीयश्चंद्रः, ततो द्वंद्वः. पुनः कीदृशास्त्रयः? रक्तकृष्णपांडुराः. रक्तं कमलं, कृष्णो गजः, पांडुरः श्वेतश्चंद्रः, एषां द्वंद्वः, पुनः कीदृशाः? श्रीनिकेताः. श्रियः लक्ष्म्याः शोभाया वा निकेताः, निकेतति वसत्येष्विति निकेता गृहाणि. कितनिवासे. निपूर्वः. अधिकरणे घञ्. श्रीनिवासस्थानानीत्यर्थः. पुनः कीदृशाः? शीतांकुशग्रहभीरवः. शीतं हिमं. अंकुशः सृणिः. ग्रहो राहुरुपरागो वा. ततो द्वंद्वः, तेभ्यो भीरवो भीताः, पुनः कीदृशाः? जलस्थलनभोमंडनाः. जलं पानीयं, स्थलं स्वभावोन्नतभूमिः, रूढ्या भूमिमात्रं वा, नभो व्योम. ततो द्वंद्वः. तेषां मंडनाः. अलंकरिष्णवः. अलंकरणशीलाः, अलंकरिष्णुस्तु मंडन इति श्रीहेमसूरिः. मंडनं तु प्रसाधने. मंडनोऽलंकरिष्णौ स्यादित्यनेकार्थसंग्रहः. एवंविधा अपि पंकजगजेंद्रचंद्रास्त्रयस्तव लोचनचंक्रमणमुखानां शोभां न प्राप्नुवंतीति तात्पर्यार्थः. अस्मिन् गाथाद्वये पादक्षेपजलज्वलनशस्त्रादिस्तंभनगगनगमनाऽदृष्टीकरणादयोऽनेके आम्नायाः संति, ते तु सद्गुरुगम्या इति. ॥ ४ ॥ ५ ॥ अथोपमं-

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

हारमाह—

॥ मूलम् ॥—एवं वीरजिणिंदो । अहरगणसंघसंथुउ जयवं ॥ पालित्तयमयमहिउ । दिसउ खयं सव्वदुरियाणं ॥ ६ ॥ व्याख्या—वीरजिनेंद्रः श्रीवर्धमानस्वामी, ममेत्यध्याहार्यं, मम सर्वदुरितानां सकलपातकानां क्षयं नाशं दिशतु, धातूनामनेकार्थत्वात्करोत्वित्यर्थः. किंविशिष्टो वीरजिनेंद्रः ? अप्सरोगणसंघसंस्तुतः, अप्सरसां सुरवधूनां गणः समुदायः, तस्य संघैः समूहैः संस्तुतः स्तुतिविषयीकृतः. यद्वा अप्सरोगणः सुरवधूसमूहः, संघश्चतुर्विधस्ताभ्यां संस्तुतः. यद्वा अप्सरस उपलक्षणत्वात्समग्रदेवदेव्यः, गणः साधुसमुदायः, सोऽस्त्येषां, अर्शआदिभ्यश्च्, गणाः गणधरा इंद्रभूत्यादयः, संघः श्रमणादिश्चतुर्विधः, तैः संस्तुतः. पुनः कीदृशो वीरजिनेंद्रः ? जगवान्, ज्ञानादिगुणयुक्तः, प्रथमगाथायामुक्तविशेषणत्वात्पुनरुक्तिदोषो नाशंकनीयः. उक्तं च—सज्झायझाण तवो—सहेसु उवएसथुइपयाणेसु ॥ संतगुणकित्तणासु य । न हुंति पुणरुत्तदोसाउ ॥ १ ॥ पुनः किंविशिष्टो वीरजिनेंद्रः ? एवं पूर्वोक्तप्रकारेण पादलिप्तकमतिमहितः, लिप्तौ पादौ यस्य स पादलिप्तः, वाहिताग्न्यादिष्विति निष्ठांतस्य परनिपातः, स्वार्थे कनि, पादलिप्तकः. प्राकृते तु कगचजतदपय-

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

वांप्रायोद्धुगिति सूत्रेण दकारलोपेऽकारस्य सवर्णदीर्घे पालित्तय इति भवति, तस्य या मतिर्बुद्धिस्तया महितः स्तुतिरूपपूजया पूजितः, अर्थात् कासद्रहगच्छीयपादलिप्तसूरिकृतमेतत्स्तोत्रमित्यर्थः. ॥ ॥ ६ ॥ विधिपक्षगणाधीशाः । सूरयो भूरिसद्गुणाः ॥ श्रीअमरसागराख्या । विचरंति महीतले ॥१॥ तत्पद्मद्योतकाः श्रीम—द्दयासागरवाचकाः ॥ सच्चारित्रगुणोपेता । ज्ञानविज्ञानपेशलाः ॥ २ ॥ तेषां प्रसादमासाद्य । पुण्यसागरवाचकैः ॥ महावीरस्तवस्येयं । टीका विरचिता शुभा ॥ ३ ॥ नंदाग्निमुनिभूसंख्ये । वर्षे मास्याश्विने सिते ॥ दशम्यां रविवारे च । बुरहानपुरे पुरे ॥ ४ ॥ इति श्रीमहावीरस्तवस्यावचूरिः संपूर्णा. ॥ श्रीरस्तु ॥

आ ग्रंथ श्रीजामनगरनिवासी पंमित श्रावक हीरालाल हंसराजे स्वपरना श्रेयमाटे
पोताना श्री जैनभास्करोदय गपखानामां गपी प्रसिद्ध कर्यो छे.

॥ समाप्तोऽयं ग्रंथो गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥

—

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ इति श्रीमहावीरजिनस्तोत्रसंग्रहः सटीकः समाप्तः ॥

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust